# आदर्शप्रश्नपत्रम् – 2021-22

## द्वितीयं सत्रम्

## कक्षा – द्वादशी

## संस्कृतम् (केन्द्रिकम्) (कोड सं.-322)

**समयः –होराद्वयम्** **अङ्कयोजना** **सम्पूर्णाङ्काः – 40**

**अवधातव्यम् –**

1. अस्याम् अङ्कयोजनायाम् प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि–शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

## वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत - | 10 |
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)<br>(i) योगदर्शनस्य<br>(ii) महर्षिः पतञ्जलिः<br>(iii) अष्ट<br>(iv) भारते<br>(v) चित्तवृत्तीनाम् | ½x4=2 |
| | (आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) योगस्य परिभाषा अस्ति – "योगः चित्तवृत्तिनिरोधः।<br>(ii) अस्माभिः जीवने सदा योगः सेवनीयः यतः योगेन जीवने नीरोगता आयाति।<br>(iii) योगस्य अष्ट अङ्गानि भवन्ति – यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः चेति। | 2×2=4 |
| | (इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।<br>**योगदर्शनम्/ योगस्य महत्त्वम्/ योगस्य अङ्गानि**<br>**अथवा छात्रैः लिखितानि पदानि दृष्ट्वा शुद्धाशुद्धनिर्णयः छात्रहिताय कर्तव्यः।** | 1×1=1 |
| | (ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)<br>(i) आविर्भावः<br>(ii) अतिप्राचीनम्<br>(iii) भवति<br>(iv) वैज्ञानिकम् | 1×3=3 |
| | **रचनात्मककार्यम्** | |
| 2. | भवान् सर्वेशः उदयपुरे वसति। भवान् उदयपुरस्य सौन्दर्यं द्रष्टुं स्वमित्रं चन्द्रेशम् आमन्त्रयति। अत्र मञ्जूषापदानां सहायतया इदं पत्रं सम्पूर्य पुनः लिखतु –<br><br>दिनाङ्कः ----------<br>10/15 हिरण्यनगरी<br>(i) **उदयपुरतः** | ½×10=5 |

| | | |
|---|---|---|
| | प्रिय सुहृद् (ii) **चन्द्रेश!**<br>सप्रेम नमः।<br>अत्र सर्वं कुशलं वर्तते भवतः कुशलताम् इच्छामि। मित्रवर! इदम् उदयपुरनगरम् अतीव (iii) **सौन्दर्य**-युक्तं स्थानं वर्तते। इदं नगरं महाराणा-उदयसिंह-राजाधिराजेन (iv) **स्थापितम्** आसीत्। इदं प्रतीयते यत् एतत् नगरं धरायाः (v) **स्वर्गम्** अस्ति। इदं सरोवराणां नगरमपि कथ्यते। यतः अत्र अनेके सरोवराः सन्ति। अनेन अत्र ग्रीष्मस्य अनुभवः अपि न भवति। निकटे एव महाराणा-प्रताप-महाभागानां स्मरणं कारयन्ती (vi) **हल्दीघाटी** अपि वर्तते। अत्र भूमिः रक्तवर्णा अस्ति। समीपे एव स्थितं वैष्णव-सम्प्रदायस्य प्रसिद्धं (vii) **तीर्थम्** नाथद्वारा अपि अस्ति। यत्र जनाः अहर्निशं तीर्थयात्रां कर्तुम् आगच्छन्ति। एकलिङ्ग-महादेवस्य (viii) **देवालयः** आर्य-समाजस्य प्रवर्तकस्य महर्षि-दयानन्दस्य संस्मरणं कारयति। यत्र महर्षिः दयानन्दः सत्यार्थप्रकाश-महाग्रन्थं रचितवान्। मित्र ! मम अतीव अभिलाषा वर्तते यत् भवान् अवश्यमेव अस्य नगरस्य (ix) **दर्शनार्थम्** अत्र आगच्छेत्। शीघ्रं स्वागमनस्य सूचनां यच्छतु भवान्।<br>भवदीयं मित्रम्<br>(x) **सर्वेशः** | |
| **3.** | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br>एकदा एकः (i) **काष्ठहरः** काष्ठान्यानेतुं वनमगच्छत्। तत्र सहसैव वृक्षस्य करुणध्वनिं (ii) **श्रुत्वा** तिष्ठति। वृक्षः समीपस्थं कर्तितं वृक्षं दृष्ट्वा रुदन्निव वदति स्म, ह्यः एकः काष्ठहारः काष्ठाय (iii) **मम** मित्रस्य शरीरमच्छिनत्। छेदनेनास्य शरीरे व्रणान् दृष्ट्वा अतीव दुःखितोऽहम्। (iv) **काष्ठानि** नीत्वा सः तु आपणं गतवान् परं अत्र कोऽपि नास्ति योऽस्य व्रणानामुपचारं कुर्यात्। किमर्थं (v) **विस्मरन्ति** जनाः यदस्माकं शरीरं न केवलं काष्ठविक्रयणाय एवास्ति अपितु वायोः (vi) **शुद्धीकरणाय** कूहानाशनाय, आतपेन श्रान्तेभ्यः पथिकेभ्यः, पशुभ्यश्च छायाप्रदानाय, खगेभ्यः (vii) **निवासाय** व्याधितेभ्यः औषधये, बुभुक्षितेभ्यः फलप्रदानाय चाप्यस्ति। काष्ठविक्रयेण तु केवलमेकवारमेव एकस्यैव लाभः जायते परमनेन चिरकालपर्यन्तं विविधाः प्राणिनः (viii) **निराश्रिताः** भवन्ति। फलौषधीनां प्राप्तिरपि दुर्लभा भवति। एवमेव एकैकं कृत्वाऽस्माकं सर्वेषां कर्तनेन वसन्तादीनां (ix) **ऋतूनां** महत्त्वमपि विलुप्तं भविष्यति। इदं (x) **सर्वं** श्रुत्वा खिन्नमनः काष्ठहरः वृक्षकर्तनात् विरम्य वृक्षारोपणं कर्तुम् आरब्धवान्। | **½×10=5** |
| | **अथवा** | |

| | | |
|---|---|---|
| | अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।<br>**वैद्यः** - आगच्छ पुत्र। किं जातम् ? ज्वरः अस्ति किम् ?<br>**राजीवः** - **न, ज्वरः नास्ति। उदरे पीडा अस्ति।**<br>**वैद्यः** - एवम्। ज्वरः न अस्ति । उदरे पीडा वर्तते। ह्यः किं भक्षितम्?<br>**राजीवः** - **ह्यः, केवलं आपणे आलुकस्य वटकाः खादिताः।**<br>**वैद्यः** - अहो! आपणे आलुकस्य वटकाः खादिताः। किं न जानासि? अधुना बहिः खाद्यवस्तूनि न खादितव्यानि। एतत् चूर्णं स्वीकरोतु।<br>**राजीवः** - **कटुः अस्ति किम्?**<br>**वैद्यः** - अरे नहि। कटुः नास्ति। पुनरपि औषधेः कृते स्वादः न गणनीयः।<br>**राजीवः** - **अस्तु। दिने कति वारं ग्रहीतव्यम्?**<br>**वैद्यः** - दिने त्रिवारम् एकचमसमात्रम् उष्णजलेन ग्रहीतव्यम्।<br>**राजीवः** - **पुनः आगमनस्य आवश्यकता अस्ति किम्? / कदा आगन्तव्यम्?**<br>**वैद्यः** - पुनः आगमनस्य आवश्यकता एव न भविष्यति । स्वास्थ्यं प्रति भविष्ये जागरूकः भव। आरोग्यं परमं सुखम्।<br>**राजीवः** - धन्यवादः। प्रणमामि। | 1×5=5 |
| 4. | अनुच्छेदलेखनम्<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्त्य अपि वाक्यनिर्माणं कर्तुं शक्यते । | 1×5=5 |
| | **अथवा** | |
| | निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -(केवलं वाक्यपञ्चकम्)<br>(i) अरविन्दः पत्रं लिखति।<br>(ii)सः कक्षायां प्रथमं स्थानं प्राप्स्यति।<br>(iii) ग्रामम् उभयतः वृक्षाः सन्ति ।<br>(iv) मम गृहे सङ्गीत-कार्यक्रमः/सङ्गीतस्य कार्यक्रमः अभवत्।<br>(v)गङ्गा हिमालयात् उद्भवति।<br>(vi) कवीनां / कविषु कालिदासः श्रेष्ठः।<br>(vii) शिक्षकः छात्राय पुस्तकं ददाति। | 1×5=5 |

| | पठितावबोधनम् | |
|---|---|---|
| 5. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – | |
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) वत्सराजः<br>(ii) वनम्<br>(iii) भोजस्य | ½x2=1 |
| | (आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम् )<br>(i) कुपितो राजा प्राह - त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्।<br>(ii) राजा भोजवधं ज्ञात्वा तं पृष्टवान्- वत्सराज! खड्गप्रहारसमये तेन किमुक्तम्? | 2x1=2 |
| 6. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - | |
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) गुणी<br>(ii) मूषकः<br>(iii) वसन्तस्य | ½x2=1 |
| | (आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)<br>(i) बलस्य महत्त्वं बली जानाति, निर्बलः च न जानाति।<br>(ii) निर्गुणः जनः गुणं न वेत्ति । | 1x2=2 |
| 7. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – | |
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) ज्ञानोदधिः<br>(ii) मदालसा<br>(iii) विवाहबन्धनम् | ½x2=1 |
| | (आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)<br>(i) कुलगुरुः मदालसायाः विषये पितरं प्रति कथितवान् यत् राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता,परं तया स्वयं वरः न प्राप्तः।<br>(ii) गुरुपादानां मतम् अस्ति यत् मदालसायै योग्यवरः अन्वेषणं कार्यम्। | 2x1= 2 |
| 8. | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –<br>**भावार्थः** – दुर्जनः शठः (i) **सहस्रैः** सज्जनैः अपि शिक्ष्यमाणः कदाचित् (ii) **सज्जनतां** न प्राप्नोति। यथा अमृतस्य समुद्रे चिरकालं यावत् (iii) **निमग्नः** मन्दरः पर्वतः (iv) **कोमलत्वं** न प्राप्नोति। अतः शठस्य अवबोधनं तु सर्वथा व्यर्थमेव। | ½x4=2 |

| | | |
|---|---|---|
| | **अथवा** | |
| | **प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br>**(क) कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।**<br>(i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्नोति।<br>**(ख) 'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः'**<br>(iii) मानवस्य आत्मनः नाशाय कामः क्रोधः लोभः च एतानि त्रीणि नरकस्य द्वाराणि एव। | 1×2=2 |
| 9. | **अधोलिखित-अन्वये मंजूषायाः साहाय्येन रिक्तस्थानानि पूरयत -**<br>**अन्वयः –** खलानां (i) **कर्णामृतं** सूक्तिरसं विमुच्य दोषेषु (ii) **सुमहान्** यत्नः (भवति) , यथा क्रमेलकः (iii) **केलिवनं** प्रविश्य कण्टकजालम् एव (iv) **निरीक्षते** । | ½×4=2 |
| | | |
| 10. | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i)ज्ञाने मौनं क्षमा शक्तौ - त्यागे श्लाघाविपर्ययः<br>(ii) कांस्यं यथा हि कुरुते - अतितरां निनादं<br>(iii)रूपं प्रसिद्धं न बुधास्तदाहुः - विद्यावतां वस्तुत एव रूपम्<br>(iv)विशेषतः सर्वविदां समाजे - विभूषणं मौनमपंडितानाम् | ½×4=2 |

------------------ oooo OOOO oooo ------------------